Introduction

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# प्राक्कथनम्

वटोदरसंस्कृतमहाविद्यालयतो ज्योतिषशास्त्रविषये प्रथमवर्गे विशेषयोग्यता-सहितमाचार्यपदवीप्राप्त्यनन्तरं संशोधनकार्य कर्तुं ममातीव दृढा मनीषा जाता। तदनुसारत: संशोधनविषयार्थं तथा च सुयोग्यमार्गदर्शकप्राप्तये प्रयत्न: प्रारब्ध:। मम भ्राता वे.शा.सं.श्रीकान्तिलाल ल. याज्ञिकोऽस्मिन्विषये मह्यं सहाय्यं कृतवान्। तेन च प्रो.डॉ. मुकुन्द वाडेकरमहोदयै: साकं मम परिचय: कारित:। विषयचयने मार्गदर्शनं च कर्तुं स मदर्थमभ्यर्थित:। अन्तरं च क्रमश: कार्यं प्रगतिपथमारूढम्। एतदर्थं मम भ्रातु: प्रथमं धन्यवादान् स्मरामि।

मम मार्गदर्शकै: प्रो. डॉ. मुकुन्द वाडेकरमहोदयैर्विषयचयने हस्तलिखितपठने-पाठनिर्धारणे-विषयप्रस्तुतीकरणे च निरन्तरं मार्गदर्शनं कृतम्। तेन चेदं कार्यं पूर्णतां सफलतां च गतम्। सदा सर्वदा संशोधनमग्नैरनेककार्यव्यस्तैरपि सायं-प्रात: यदा-कदापि मया गतं तदा सोत्साहमविश्रान्तं सर्वप्रकारकं सुयोग्यं मार्गदर्शनं विद्यादानं च कृतम्। मम ज्ञानदीपकश्च प्रज्वालित:। तेषामहं हृदयेनोपकारभारान् स्मरामि।

प्राच्यविद्यामन्दिरस्थै: संशोधकै: कार्यकारिभिश्च मम संशोधनार्थमुपयुक्तानां पुस्तकानां हस्तलिखितानां च सरलतया सम्प्राप्ति: कारित:। विशेषत: डॉ.मीना पाठक, डॉ.शर्मिला बागची, डॉ.मिलिन्द जोशी, श्री. प्रफुल्ल सुर्वे -इत्यादीनां हार्दिकं धन्यवादज्ञापनं करोमि।

आनन्दाश्रमसंस्था, पुणे, रणवीर – संस्कृत – पुस्तकालयः, जम्मु, प्राच्यविद्यामन्दिरं, वडोदरा– एताभिः संस्थाभिर्हस्तलिखितानां प्रतिकृतिप्रदानेन संशोधनकार्ये सहाय्यं कृतम्। तेषामहमाभारं निवेदयामि।

वटोदरसंस्कृतमहाविद्यालयस्य प्राचार्याः श्री. योगेश ओझा महोदयानां तथा च कलासंकायस्य प्रमुखानां प्रो. डॉ. नितिन व्यास महोदयानां संशोधनकार्ये सौविध्यकरणार्थं धन्यवादाः। मम गुरूणां श्री. सञ्जय जोशीमहोदयानामपि संशोधनकार्ये पुस्तकादिना सहाय्यकरणार्थमुपकारभारं स्मरामि। येषां केषांचन प्रत्यक्षमप्रत्यक्ष सहाय्यं मम गृहीतं किन्तु विस्तारभयान्नोल्लेखो कृतस्तेषां सर्वेषामुपकारस्मरणं करोमि।

अन्ते च मम जनन्या जनकस्य चोपकारभारं स्मरामि। येषामहं सदैवाधमर्णोऽस्मि। कर्तुमकर्तुमन्यथा कर्तुं समर्थस्यागाधमहिम्नः परमेश्वरस्य केन वचसोपकारभारः स्मर्यते? तस्यैव कृपाप्रसादादिदं सर्वं सिद्धं भवति। तस्मै तु केवलं पुनः पुनर्नमस्कारः।

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम।।**

अनन्तचतुर्दशी **दीपककुमार लक्ष्मीशङ्कर आरम्भडिया**

११/०९/२०११

MEHTA LIBRARY
University of Baroda

# गुरुवन्दना

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।
यस्य वेदमयी वाणी यस्य देवमयी तनुः।
यस्य ब्रह्ममयी दृष्टिः स गुरुः पातु मां सदा।।
यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम्।
य एव सर्वसम्प्राप्तिस्तस्मै श्रीगुरवे नमः।।
ध्याममूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम्।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा।।
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि।।

।। ब्रह्मर्षिकश्यपाय नमो नमः ।।



ब्रह्मर्षिकश्यपः

Smt. Hansa Mehta Library, The M. S. University of Baroda